ॐ पवित्रे स्थो वैष्णाव्यो सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। तस्य ते पवित्रपते पवित्र पूतस्य यत्कामः पुनेतच्छकेयम्॥

पूगीफल को कलश में डाल देवे-

पूगीफल-

ॐ याः फलीनीर्या अफला अपुष्पा याश्च पुष्पिणिः। बृहस्पति प्रसूतास्तानो मुञ्चन्त्व ॐ हसः।

कलश में सुवर्ण वज्रमणि, नील, पद्मराग, मोती (पंचरत्न) डाल देवें-

पंचरत्न[१]-

ॐ परिवाजपतिः कवि रग्निर्हव्यान्यक्रमीत्।
दधद्रत्नानि दाशुषे॥

कलश में सुवर्ण अथवा द्रव्य दक्षिणा डाल देवे-

---

१. पंचरत्न-

कनकं कुलिशं नीलं पद्मरागं च मौक्तिकम्।
एतानि पंचरत्नानि रत्नशास्त्र विदो विदुः॥

दक्षिणा-

ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्।
सदाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम्॥

चावलों से भरे पात्र को कलश के ऊपर रख देवें-

पूर्णपात्र-

ॐ पूर्णा दर्वि परापत सुपूर्णा पुनरापत।
वस्नेव विक्रीणावहा इषमूर्ज ॐ शतक्रतो॥

कलश को मौली (कलावा) बांध देवें-

वस्त्र-

ॐ सुजातो ज्योतिषा सह शर्म वरुथमा सदत्स्वः।
वासो अग्ने विश्वरूप ॐ संव्ययस्व विभावसो॥

नारियल (श्रीफल) को वस्त्र लपेट कलश के ऊपर स्थापित करें-

श्रीफल स्थापन-

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणा मुम्मऽइषाण सर्वलोकम्मऽइषाण॥

एक आचमन जल लेकर वरुण कलश के पूजन के लिए विनियोग छोड़े।

विनियोग-

ॐ तत्वायामिति शुनषेफ ऋषि त्रिष्टुप्छन्दो वरुणो देवता वरुणावाहने पूजने विनियोगः।

जल छोड़ कर कलश में वरुण देवता का आवाहन निम्न मंत्र से करें-

आवाहन-

ॐ तत्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोध्युरुश ँ समा न आयुः प्रमोषीः।। ॐ भूर्भुवः स्वः अस्मिन् कलशे वरुणं सांग सपरिवारं आवाहयामि स्थापयामि पूजयामि।।

वरुण कलश का पूजन निम्न प्रकार करें-

आसनार्थेऽक्षतान् समर्पयामि। (अक्षत)
पादयो पाद्यं समर्पयामि। (पाद्य)
हस्तयोः अर्घ्यं समर्पयामि। (अर्घ्य)
आचमनं समर्पयामि। (आचमन)
पंचामृत स्नानं समर्पयामि। (पंचामृत)
शुद्धोदक स्नानं समर्पयामि। (शुद्धजल)
वस्त्रं समर्पयामि। (वस्त्र)
आचमनं समर्पयामि। (आचमन)
यज्ञोपवीतं समर्पयामि। (यज्ञोपवीत)
आचमनं समर्पयामि। (आचमन)
गन्धं समर्पयामि। (गन्ध)
अक्षतान् समर्पयामि। (अक्षत)
पुष्पं समर्पयामि। (पुष्प)
धूपमाघ्रापयामि। (धूप)
दीपं दर्शयामि। (दीपक)
नैवेद्यं निवेदयामि। (नैवेद्य)
पुनः आचमनं समर्पयामि। (आचमन)
ताम्बूल पूगीफलं समर्पयामि। (पानसुपारी)
कृतायाः पूजायाः षाद्गुण्यार्थे द्रव्यदक्षिणां समर्पयामि।
(द्रव्य दक्षिणा चढ़ा देवे)

प्रार्थना-

देव दानव-संवादे मथ्यमाने महोदधौ।
उत्पन्नोऽसि तदा कुम्भ! विधृतो विष्णुना स्वयम्॥१॥
त्वत्त्वोये सर्व तीर्थानि देवाः सर्वे त्वयि स्थिताः।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिता॥२॥
शिवः स्वयं त्वमेवाऽसि विष्णुस्त्वं च प्रजापतिः।
आदित्या वसवो रुद्रा विश्वेदेवाः स-पैतृकाः॥३॥
त्वयितिष्ठन्ति सर्वेऽपि यतः काम फल प्रदाः।
त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव!॥
सान्निध्यं कुरु मे देव! प्रसन्नो भव सर्वदा॥४॥
नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमंगलाय।
सुपाश हस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते।
पाशपाणे! नमस्तुभ्यं पद्मिनी जीव नायकं।
यावत्कार्य समाप्तिस्या तावत्वं सन्निधोभव॥

॥ इति कलश पूजनं सम्पूर्णम् ॥



॥ पुण्याह वाचनम् ॥

उत्तराभिमुख ब्राह्मण तथा पूर्वाभिमुख यजमान बैठे। यजमान ब्राह्मणों का निम्न मन्त्रों से पूजन करें। ब्राह्मण आशीर्वाद देवे-

यजमान-

ॐ शिवा आपः सन्तु। यजमान ब्राह्मणों को जल देवे।

ब्राह्मण- ॐ सन्तु शिवाः आपः। ब्राह्मण जल लेवें।

यजमान- ॐ सौमनस्य मस्तु। ब्राह्मणों को यजमान पुष्प देवे।

ब्राह्मण- ॐ अस्तुसौमनस्यम्। ब्राह्मण पुष्प लेवे।

यजमान- ॐ अक्षता पान्तु। यजमान अक्षत देवे।

ब्राह्मण- ॐ मांगल्यमस्तु। ब्राह्मण अक्षत लेवे।

यजमान- ॐ गन्धाः पान्तु। यजमान ब्राह्मणों को गन्ध देवे।

ब्राह्मण- ॐ आयुस्मस्तु। ब्राह्मण गन्ध लेवे।

यजमान- ॐ पुष्पाणि पान्तु। यजमान पुष्प देवे।

ब्राह्मण- ॐ सोश्रियमस्तु। ब्राह्मण पुष्प लेवे।

यजमान- ॐ ताम्बूलानिपान्तु। यजमान ताम्बूल देवे।

ब्राह्मण- ॐ एश्वर्य मस्तु। ब्राह्मण ताम्बूल लेवे।

यजमान- ॐ दक्षिणाः पान्तु। ब्राह्मणों को यजमान दक्षिणा देवे।

ब्राह्मण- ॐ बहुधनं चास्तु। ब्राह्मण दक्षिणा लेवे।

पुनः यजमान ब्राह्मणों को प्रणाम कर प्रार्थना करें।

यजमान- श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं चायुष्यं चास्तु॥

ब्राह्मण- तथास्तु॥ (ऐसा ही हो)

यजमान- यत्कृत्वा सर्व वेद यज्ञ क्रिया कर्मारम्भाः शुभाः शोभनाः प्रवर्तन्ते तमहमोकारमादिकृत्वा ऋग्यजुः

सामाथर्वणाशीर्वचनम् वह्वर्षिभिः। समनुज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये॥

ब्राह्मण- वाच्यताम्॥

यजमान- व्रत नियम तपः स्वाध्याय क्रतुदमदानविशिष्ठानां सर्वेषां ब्राह्मणानां मनः समाधीयताम्॥

ब्राह्मण- समाहित मनसः स्मः॥

यजमान- प्रसीदन्तुः भवन्तः॥

ब्राह्मण- प्रसन्नास्मः॥

ततो यजमानः अवनिकृत जानुमण्डलः कमल मुकुल सदृश अंजलिं शिरस्याधाय दक्षिणेन पाणिना सुवर्ण (ताम्र) कलशं धारयित्वा भूमौ स्थापिते पात्रद्वये प्रथमपात्रे किञ्चित्उदकं पातयेत् तथा ब्राह्मण वदेयुः॥

अर्थात् इसके पश्चात् यजमान उकडू बैठकर दोनों हाथों को कमल के समान अंजली बनाकर हाथों पर कलश रखें तथा कलश को शिर से लगावे। ब्राह्मण दो पात्रों में जल रखे, प्रथम पात्र के जल से सपरिवार यजमान को छीटें लगावे-

ब्राह्मण-

ॐ शान्तिरस्तु। ॐ पुष्टिरस्तु। ॐ तुष्टिरस्तु। ॐ वृद्धिरस्तु। ॐ आयुष्यमस्तु। ॐ आरोग्यमस्तु। ॐ शिवं कर्मास्तु। ॐ धर्म समृद्धिरस्तु। ॐ कर्म समृद्धिरस्तु। ॐ वेद समृद्धिरस्तु। ॐ शास्त्र समृद्धिरस्तु। ॐ पुत्रपौत्र समृद्धिरस्तु। ॐ धनधान्य समृद्धिरस्तु। ॐ इष्टसम्पदस्तु।

दूसरे पात्र के जल को ब्राह्मण यजमान के ऊपर घुमाकर बाहर की ओर छीटे लगावे-

ॐ अरिष्टनिरसनमस्तु। ॐ यत्पापमरोगऽशुभम-ऽकल्याणं तद्दूरे प्रतिहतमस्तु॥

पुनः प्रथम पात्र के जल से ब्राह्मण यजमान को छीटें लगावे-

ॐ यच्छ्रेयस्तदस्तु। ॐ उत्तरेकर्मणि निर्विघ्नमस्तु। ॐ उत्तरोत्तराः क्रियाः शुभाः शोभनाः सम्पद्यताम्। ॐ तिथिकरण मुहूर्त नक्षत्र ग्रह लग्नादि देवताः प्रीयन्ताम्। ॐ दुर्गा पांचाल्यौ प्रियन्ताम्। ॐ अग्निपुरोगा विश्वेदेवाः प्रीयन्ताम्। ॐ इन्द्र पुरागो मरुद्गणाः प्रीयन्ताम्। ॐ माहेश्वरी पुरोगा उमामातरः प्रीयन्ताम्। ॐ वशिष्ठ पुरोगाः ऋषिगणाः प्रीयन्ताम्। ॐ अरुन्धति पुरोगाः पतिव्रताः प्रीयन्ताम्। ॐ ब्रह्म पुरोगाः सर्वे वेदाः प्रीयन्ताम्। ॐ विष्णुपुरोगाः सर्वे देवाः प्रीयन्ताम्। आदित्यपुरोगाः सर्वेग्रहाः प्रीयन्ताम्। ॐ ॐ ब्रह्म च ब्राह्मणश्च प्रीयन्ताम्। ॐ अम्बिका सरस्वत्यौ प्रीयेताम्। ॐ श्रद्धामेधे प्रियेताम्। ॐ भगवती कात्यायनी प्रीयेताम्। ॐ भगवती माहेश्वरी प्रीयताम्। ॐ भगवती ऋद्धिकरी प्रीयताम्। ॐ भगवती सिद्धिकरी प्रीयताम्। ॐ भगवती पुष्टिकरी प्रीयताम्। ॐ भगवती तुष्टिकारी प्रीयताम्। ॐ भगवन्तो विघ्नविनायकौ प्रियेताम्। ॐ सर्वाः कुलदेवताः प्रीयन्ताम्। ॐ सर्वा ग्रामदेवताः प्रीयन्ताम्। ॐ सर्वाः इष्ट देवताः प्रीयन्ताम्॥

पुनः द्वितीय पात्र के जल को ब्राह्मण यजमान के ऊपर घुमाकर निम्न मंत्र से बाहर छिड़कें-

ॐ हताश्च ब्रह्मद्विषः। ॐ हताश्च परिपंथिनः। ॐ हताश्च विघ्न कर्तारः। ॐ शत्रवः पराभवंयांतु। ॐ

शाम्यन्तु घोराणि। ॐ शाम्यन्तु पापानि। ॐ शाम्यन्त्वीतयः।।

पुनः प्रथम पात्र के जल से ब्राह्मण यजमान के मस्तक में जल के छींटे लगावे-

ॐ शुभानि वर्धन्ताम्। ॐ शिवा आपः सन्तु। ॐ शिवा ऋतवः सन्तु। ॐ शिवा औषधयः सन्तु। ॐ शिवा वनस्पतयः सन्तु। ॐ शिवा अथितयः सन्तु। ॐ शिवा अग्नयः सन्तु। ॐ शिवा आहुतयः सन्तु। ॐ अहोरात्रे शिवे स्याताम्।।

ॐ निकामे निकामे नः पर्जन्यो व्यर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पन्ताम्।।

ॐ शुक्रांऽङ्गारक-बुध-बृहस्पति-शनैश्चर-राहू-केतु सोम सहिता:आदित्यपुरोगा:सर्वे ग्रहाः प्रीयन्ताम्।

ॐ भगवान् नारायणः प्रीयताम्। ॐ भगवान् पर्जन्यः प्रीयताम्। ॐ भगवान् स्वामी महासेनः प्रीयताम्। ॐ पुरोऽनुवाक्यया यत्पुण्यं तदस्तु याज्यया यत्पुण्यं तदस्तु। वषट्कारेण यत्पुण्यं तदस्तु। प्रातः सूर्योदये यत्पुण्यं तदस्तु।। ततौ यजमानः कलशं भूमौ निधाय प्रथम पात्रीय जलेन यजमानस्य सपरिवास्य शिरः संमृज्य द्वितीय पात्रजलं एकान्ते पातयेत्।।

यजमान कलश को भूमि में रखे, ब्राह्मण प्रथम पात्र के जल से यजमान का सपरिवार अभिषेक करे, दूसरे पात्र के जल को एकान्त में गिरा देवे।

यजमान प्रार्थनापूर्वक ब्राह्मणों से कहे-

ब्राह्मं पुण्यं महर्द्यंच सृष्ट्युत्पादनकारकम्।
वेदबृक्षोद् भवं नित्यं तत्पुण्याहं ब्रुवन्तु नः।।
भो ब्राह्मणाः! मया क्रियमाणस्य[1] (दुर्गापूजनाख्यस्य)
कर्मणः पुण्याहं भवन्तो ब्रुवन्तु।।

ब्राह्मण-

ॐ पुण्याहं पुण्याहं पुण्याहम्।।
पुनन्तु मा देवजनाः पुनन्तु मनसा धियः।
पुनन्तु विश्वाभूतानि जातवेदः पुनीहिमा।।

यजमान-

पृथिव्यामुद् धृतायान्तु यत्कल्याणं पुराकृतम्।
ऋषिभिः सिद्ध गन्धर्वैस्तत कल्याणं ब्रुवन्तु नः।।
भो ब्राह्मणाः! मया क्रियमाणस्य दुर्गापूजना-
ख्यस्य कर्मणः कल्याणं भवन्तो ब्रुवन्तु।।

ब्राह्मण-

ॐ कल्याणं कल्याणं कल्याणम्।।

ॐ यथेमां वाचं कल्याणी मावदानि जनेभ्यः ब्रह्मराजन्याभ्यां ॐ शूद्राय चार्याय च स्वाय चारणाय च। प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृध्यतामुपमादौ नमतु।।

यजमान-

सागरस्य च या लक्ष्मीमहालक्ष्म्यादिभिः कृताः।
सम्पूर्णा सुप्रभावा च तां तामृद्धि ब्रुवन्तु नः।।

---

१. यहां क्रियमाण यज्ञ, पूजन, पाठ आदि कर्म के नाम का उच्चारण करें।

भो ब्राह्मणाः! मयाक्रियमाणस्य दुर्गापूजनाख्यस्य कर्मणः ऋद्धि भवन्तो ब्रुवन्तु॥

ब्राह्मण-

ॐ ऋद्ध्यताम् ऋद्ध्यताम् ऋद्ध्यताम्॥

ॐ सत्रस्य ऽ ऋद्धिरस्यगन्म ज्योतिरमृताऽअभूम।

दिवं पृथिव्याऽअध्यारुहामाविदाम देवान् स्वर्ज्योतिः॥

यजमान-

स्वस्तिस्तुया विनाशाख्या नित्यं मंगलदायिनी।

विनायकप्रिया नित्यं तां च स्वस्ति ब्रुवन्तु नः।

भो ब्राह्मणाः! मया क्रियमाणस्य दुर्गापूजनाख्य कर्मणः स्वस्ति भवन्तो ब्रुवन्तु॥

ब्राह्मण-

ॐ आयुष्मते स्वस्ति, आयुष्मते स्वस्ति आयुष्मते स्वस्ति॥

ॐ स्वस्ति न ऽ इन्द्रो व्वृद्धश्रवाः स्वस्तिनःपूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्यो ऽअरिष्टिनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥

यजमान-

समुद्रमथनाज्जाता जगदानन्दकारिका।

हरिप्रिया च मांगल्या तां श्रियं च ब्रुवन्तु नः॥

भो ब्राह्मणाः। मयाक्रियमाणस्य दुर्गापूजनाख्यस्य कर्मणः श्रीरस्त्विति भवन्तो ब्रुवन्तु॥

ब्राह्मण-ॐ अस्तु श्री अस्तु श्री अस्तु श्री॥

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि

रूपमश्विनौ व्यात्तम्। इष्णं निषाणामुंमऽइषाण सर्वलो- कंमऽइषाण।।

आरती- पतिपुत्र वाली सौभाग्यवती (अथवा) ब्राह्मण, इस समय सत्पत्नीक यजमान की आरती उतारें, इस समय आचार्य निम्न मंत्र पढ़ता जाय-

ॐ अनाधृष्टाः पुरस्तादग्रेराधिपत्यऽआयुर्मेदाः।
पुत्रवती दक्षिणतऽइन्द्रस्याधिपते प्रजां मे दाः।
सुषदा पश्चाद्देवस्य सवितुराधिपत्ये चक्षुर्मे दाः।
आश्रुतिरुत्तरतो धातुराधिपत्ये रायस्पोषं मे दाः।
विधृतिरुपरिष्टाद् बृहस्पते राधिपत्यऽ ओजो मे दाः।
विश्वाभ्यो मा ना ष्ट्राभ्यस्पाहि मनोरश्वासि।।

दक्षिणा दान संकल्प-

अद्यः कृतैतपुण्याहवाचन कर्मणः सांगता सिद्धयर्थ तत्सम्पूर्णफल प्राप्त्यर्थं च पुण्याहवाचकेभ्यो ब्राह्मणेभ्यो यथाशक्ति हिरण्यादि दक्षिणां विभज्य दातुमहमुत्सृजेत्।।

।। इति पुण्याहवाचनम् ।।



॥ ब्राह्मण वरण ॥[१]

आचार्यादि को उत्तर मुख बैठाकर स्वयं यजमान पूर्वाभिमुख रहता हुआ आचार्यादि का स्पर्श करता हुआ संकल्प पढ़े-

ॐ अद्यैत्यादि० (देश काल का नाम लेते हुए) **अमुकगोत्रोत्पन्नः अमुकशर्माहं अमुक राशैः** (यजमान अपने नाम, गोत्र, राशि का उच्चारण करें) **अमुक गोत्रोत्पन्नममुक शर्माणं ब्राह्मणमस्मिन् दुर्गापूजनकर्मणि एभिर्गन्धाक्षत ताम्बूल मुद्रिका आसनकमण्डलुवासोभिः** (अथवा) **द्रव्यदक्षिणाया आचार्यादि (ब्रह्मत्वेन ऋत्विकत्वेन) कर्मकर्तु युष्मानहं वृणे॥** (आपका वरण कर रहा हूँ।)

आचार्य आदि ब्राह्मण कहे- **ॐ वृतास्मः॥**

हमारा वरण हो चुका है।

यजमान प्रार्थना करे-

आचार्य प्रार्थना-

आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः।
तथा त्वं मम यज्ञेऽस्मिन् आचार्यो भव सुव्रतः॥१॥

बह्मा प्रार्थना-

यथा चतुर्मुखो ब्रह्मा वेद शास्त्र विशारदः।
तथा त्वं यज्ञेस्मिन्ब्रह्मा --भव द्विजोत्तम॥२॥

---

१. वरण द्रव्य
भोजनं भोजनाधारंछत्रोपानत्कमण्डलुः।
आसनं वसनं मुद्राकर्णभूषोपवीतकम्॥
एतद्दशविधं देयं पात्र वस्त्रांगुलीयकम्।
पादाभावे त्रयं देय पात्र वस्त्रांगुलीयकम्॥ (रुद्रकल्पे)

ऋत्विक प्रार्थना-

ऋत्विजश्च यथा पूर्वं शक्रादीनां मखेऽभवन्।
यूयं तथा मे भवितुमृत्विजोऽर्हथ सत्तमा ॥३॥

यजमान आचार्य, ब्रह्मा, ऋत्विको को वरण द्रव्य तथा द्रव्य दक्षिणा देवे तथा आचार्य यजमान के हाथ में [१] रक्षाबन्धन तिलक कर देवे।

मंत्र-

ॐ आयुष्यं वर्चस्य ँ रायस्पोषमौद्भिदम्। इद ँ हिरण्यं वर्चस्वज्जैत्रायाविशतादुमाम्। न तद्रक्षा ँ सिन पिशाचास्तरन्ति देवानामोजः प्रथम ँ ह्येतत् यो विभर्त्ति दक्षिणायण ँ हिरण्य ँ सदेवेषु कृणुते दीर्घमायुः। समनुष्येषु कृणुते दीर्घमायुः॥

ॐ यदाबध्नन् दाक्षायणा हिरण्य ँ शतानीकाय सुमनस्य मानाः। तन्मऽआबध्नामि शतशारदायायुष्मान् जरदष्टिर्य्यथासम्॥

॥ इति ब्राह्मण वरणम् ॥

॥ ॐकार पूजनम् ॥

आवाहयाम्यहं देवमोकारं परमेश्वरम्।
त्रिमात्रं त्र्यक्षरं दिव्यं त्रिपदञ्च त्रिदेवकम्॥
त्र्यक्षरं त्रिगुणाकारं सर्वाक्षर मयं शुभम्।
त्र्यणवं प्रणवं हंसं स्त्रष्टारं परमेश्वरम्॥

---

१. **पत्नी वाम करे सूत्रं वद्धं सौख्यं धनागमन्।**
बहु सम्पति आरोग्यं रक्षार्थे कंकणं शुभम्॥

ॐ भूभुर्व स्वः भगवन् ओंकार। इहागच्छ इह तिष्ठ॥

ॐ कार में ब्रह्मा, विष्णु, रुद्र का पूजन-

ॐ ब्रह्मजज्ञानं प्रथमं पुरुस्ताद्वि सीमतः सुरुचो वेनऽआवः। सबुध्न्याऽउपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः॥

ॐ इदं विष्णुर्विचक्रमे त्रेधानिदधे पदम्।
समूढ़ मस्य पा ँ सुरे स्वाहा॥

ॐ नमः शम्भवाय च मयोभवाय च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च॥

ॐ कार स्थित ब्रह्म, विष्णु रूद्र का पूजन गन्ध अक्षतादि से कर प्रार्थना करें-

ॐ कार बिन्दु संयुक्तं नित्यं ध्यायन्ति योगिनः।
कामदं मोक्षदं चैव ॐ काराय नमो नमः।

॥ सप्तघृत मातृका पूजनम् ॥

ध्यान-

या श्री स्वयं सुकृतिनां भवनेष्वलक्ष्मीः।
पापात्मनां कृतधियां हृदयेषु बुद्धि ॥
श्रद्धा सतां कुलजन प्रभवस्य लज्जा।
तां त्वां नताः स्म परिपालय देवि विश्वम्॥

स्थापन-

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णंनिषाणामुं मऽइषाण सर्वलोकं मऽइषाण॥

ॐ श्रिये नमः। ॐ लक्ष्म्यै नमः ॐ धृत्यै नमः। ॐ मेधायै नमः। ॐ स्वाहायै नमः। ॐ प्रज्ञायै नमः। ॐ

सरस्वत्यै नमः॥

सप्त घृत मातृकाओं का पूजन गन्ध अक्षत पुष्प धूप दीपक नैवैद्य से करके दक्षिणा अर्पण करें।

प्रार्थना-

श्रीलक्ष्मीधृर्तिमेधा स्वाहा प्रजा सरस्वती।
मांगल्येषु प्रपूज्यन्ते सप्तेता घृतमातरः॥

॥ इति घृतमातृका पूजनम् ॥

॥ षोडश मातृका पूजनम्॥

मातृका स्थापन-

ध्यान- ॐ गौरी पद्मा शची मेधा सावित्री विजया जया।
देवसेना स्वधा स्वाहा मातरो लोकमातरः॥
धृतिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवता।
गणेशेनाधिकाह्येता वृद्धो पूज्यास्तु षोडश॥

प्रतिष्ठापन-

ॐ आयं गौः पृश्निरक्रमीद सदन् मातरं पुरः।
पितरं च प्रयन्त्स्वः॥

ॐ गणपतये नमः ॥ ॐ गौर्ये नमः ॥
ॐ पद्मायै नमः ॥ ॐ शच्चै नमः ॥
ॐ मेधायै नमः ॥ ॐ सावित्र्यै नमः ॥
ॐ विजयायै नमः ॥ ॐ जयायै नमः ॥
ॐ देव सेनायै नमः ॥ ॐ स्वधायै नम॥
ॐ स्वाहायै नमः॥ ॐ मातृभ्यो नमः ॥
ॐ लोकमातृभ्यो नमः॥ ॐ धृत्यै नमः ॥

ॐ पुष्ट्यै नमः ।। ॐ तुष्ट्यै नमः ।।
ॐ कुलदेवतायै नमः ।।

ॐ गौर्याद्याषोडष मातृका देव्येभ्यो नमः सर्वोपचारार्थे गन्धाक्षतं पुष्पं धूपदीप नैवेद्यं द्रव्यदक्षिणां च समर्पयामि।

प्रार्थना- ॐ ब्रह्माणी कमलेन्दु सौम्यवदनां माहेश्वरी लीलया।
कौमारी रिपुदर्प नाशनकरी चक्रायुधा वैष्णवी।।
वाराही घनघोर घुरघुरुमुखी चैन्द्रि च व्रजायुधा।
चामुण्डा गणनाथ रुद्र सहिता रक्षन्तु मां मातरः।।
आयुरारोग्यमैश्वर्यं दधध्वं मातरो मम।
निर्विघ्नं सर्वकार्येषु कुरुध्वं सगणाधिपाः।।

।। इति षोडश मातृका पूजनम्।।

।। अष्ट वसु पूजनम् ।।

वसोः पवित्रमिति मंत्रस्य प्रजापति ऋषिः सविता देवता जगती छन्दः वस्वावाहने पूजनै विनियोगः

ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारं देवस्त्वा सावितापुनातु। वसोः पवित्रेण शतधारेण सुप्त्वा कामधुक्षः।।

ॐ ध्रुवाय नमः।।१।। ॐ धराय नमः।।२।।
ॐ सोमाय नमः।।३।। ॐ आपाय नमः।।४।।
ॐ अनिलाय नमः।।५।। ॐ अनलनाय नमः।।६।।
ॐ प्रत्यूषाय नमः।।७।। ॐ प्रभासाय नमः।।८।।
ध्रुवाद्यष्टवसवे नमः आवाहयामि स्थापयामि।।

अष्टवसुओं का नाम मात्र से आवाहन स्थापन कर गन्ध

अक्षत पुष्प धूप दीपक नैवेद्य दक्षिणा से पूजन कर देवे।

प्रार्थना- **दिव्यवस्त्रा दिव्यदेहा दिव्य माला विभूषिता।**
वसवोऽष्टौ महाभागाः वरदाः सन्तु मे सदा॥

॥ इति अष्ट वसु पूजनम् ॥

॥ नान्दी श्राद्धम्[1]॥

देवताओं तथा पितरों का ध्यान-

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च।
नमः स्वाहायै स्वधायै नित्यमेव नमोनमः॥
श्राद्धकाले गयां ध्यात्वा ध्यात्वा देवं गदाधरम्।
मनसा च पितृन्ध्यात्वा नान्दी श्राद्धं समारभे॥

नान्दी श्राद्ध में विश्वेदेवा के लिए एककुशा, मातृपक्ष के लिए तीन कुशा, पिता पक्ष के लिए तीन कुशा, मातामही पक्ष के लिए तीन कुशा, मातामह पक्ष के लिए तीन कुशा अथवा दूर्वा पत्तों में रख मन में गया, गदाधर भगवान पितरों का ध्यान करते हुए संकल्प कहे-

ॐ तत्सदद्य० मासोत्तमेऽमुकमासे अमुकपक्षे अमुक तिथौ अमुकवासरे अमुक कर्मांगीभूतं ब्राह्मणयुग्म-भोजन पर्याप्तान्ननिष्क्रयीभूत- यथा-शक्ति-हिरण्येन नान्दीमुख-श्राद्धमहं करिष्ये॥

---

१. **रजो दोष जनना शौचादि संभावनाय नान्दीश्राद्धस्यपकृष्णा-नुष्ठानेदिनावधिः**
एक विंशतिहर्यज्ञे विवाहेदश वासराः ।
त्रिषट्चौलोपनयने नान्दिश्राद्धं विधियते॥
(दशदिनाद्यति क्रमे पुनर्नान्दी श्राद्ध मित्यर्थात् सिद्धम्) (कर्मठगुरौ)।

ॐ सत्यवसु संज्ञका विश्वेदेवा नान्दीमुखाः ॐ भूभूर्व स्वः पाद्यः स्वाहा नामयं च वृद्धि॥ ॐ अमुक गोत्राः मातृ पितामही प्रपितामह्यः नान्दीमुखाः ॐ भूभूर्वः स्वः इदं वः पाद्यं स्वाहा नामयं च वृद्धि॥

ॐ अमुक गोत्राः पितृ पितामह प्रपितामहाः नान्दीमुखाः ॐ भूभूर्वः स्वः इदं वः पाद्यं स्वाहा नामयं च वृद्धि॥

ॐ अमुक गोत्राः मातामह प्रमातामह वृद्धप्रमातामहाः पत्नीसहिताः नान्दीमुखाः॥ ॐ भूभुर्वः स्वः इदं वः पाद्यं स्वाहा नामयं च वृद्धि॥

उपरोक्त विश्वेदेवा, मातृपक्ष, पितृपक्ष, नाना, नानी पक्ष को आसन देवे पुनः कहें-

एष वो गन्धः, इमे अक्षताः, इमानि पुष्पाणि, अयं धूपः, अयं दीपः, इमे वाससीः, इदं यज्ञोपवीतं॥

इस प्रकार सब पितरों का पूजन कर नमस्कार करें-

ॐ पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः॥

आमान्न संकल्प-

अद्यैत्यादि० सत्यवसु संज्ञकाः विश्वेदेवा नान्दीमुखाः ॐ भूभुर्वः स्वः युग्म ब्राह्मण भोजन पर्यन्तं दास्यमानं मन्नं यथाशक्ति सोपस्करं स्वाहा नामयं च वृद्धिः युग्म भोजन आमान्नं नैवेद्यं तन्निष्क्रियं दक्षिणां च दातु समुत्सृजेत्॥

प्रार्थना-


माता पितामहि चैव तथैव प्रपितामही।
पिता पितामहश्चैव तथैव प्रपितामहः।।
मातामहस्तत्पिता च प्रमातामहकादयः।
एते भवन्तु सुप्रीता प्रयच्छन्तु च मंगलम्।।

ॐ विष्णवे नमः ॐ विष्णवे नमः ॐ विष्णवे नमः।।

विसर्जन-

ॐ वाजेवाजेऽवत वाजिनो धनेषु विप्राऽअमृताऽऋतज्ञा।
अस्यमध्वः पिबतं मादयद्धवं तृप्ता यात पथिभिर्द्देवयानैः।।
अनेन कर्मणाः नान्दीमुख देवताः प्रीयन्ताम् न मम।।

।। इति नान्दी श्राद्धम्।।



॥ नवग्रह पूजनम्॥

नवग्रहों में ग्रह अधिपति सूर्य का पूजन वर्तुलाकृति, अर्ध चन्द्राकृति सोम, त्रिकोण मंगल, बाणाकार बुध, चतुष्कोण बृहस्पति, पंचकोण शुक्रं, धनुराकार शनि, शूर्पाकार राहू, ध्वजाकार निर्माण कर केतु का पूजन करें। पूजन निम्न क्रम से करें-

सूर्य पूजन-

ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यञ्च। हिरण्ययेन सविता रथेनादेवो याति भुवनानि पश्यन्॥सूर्याय नमः॥

चन्द्र पूजन-

ॐ इमं देवाऽ असपत्न ँ सुवध्वं महते क्षत्राय महते जैष्ठ्याय मंहते ज्यानराज्यायेन्द्रस्येन्द्रियाय। इमममुष्य पुत्रममुख्यै पुत्रमस्यै विशऽएष वोऽवी राजा सोमोऽस्माकं ब्राह्मणाना ँ राजा॥ चन्द्राय नमः॥

भौम पूजन-

ॐ अग्निमूर्द्धा दिवः ककुत्पतिः पृथिव्याऽ अयम। अपा ँ रेता ँ सिजिन्वति॥ भौमाय नमः॥

बुध पूजन-

उद्बुध्य स्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते स ँ सृजेथामयं च। अस्मिन्त्सधस्तेऽध्युतरस्मिन्विश्वेदेवा यजमानश्च सीदत॥ बुधाय नमः॥

गुरु पूजन-

ॐ बृहस्पते ऽअतियदर्योऽअर्हाद्युमद्विभाति क्क्रतु

मज्जनेषु। यद्दीदयच्छवसऽऋतप्प्रजात् तदस्मासु द्रविणं धेहि चित्रम्॥ गुरुवे नमः॥

शुक्र पूजन-

ॐ अन्नात्परिस्रुतो रसं ब्रह्मणा ब्व्यपिवत्क्षत्रं पयः सोमं प्रजापतिः। ऋतेन सत्यमिन्द्रियं विपान ँ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोमृतं मधु॥ शुक्राय नमः॥

शनि पूजन-

ॐ शं नो देवीरभिष्टयऽआपो भवन्तु पीतये। शं योरभिस्त्र वन्तु नः॥ शनैश्चराय नमः॥

राहू पूजन-

ॐ कयानश्चित्र आभुव दूती सदावृधः सखा। कयाशचिष्ठयाऽवृत्ता। राहवे नमः॥


केतु पूजन-

ॐ केतुं कृण्वन्नकेतवे पेशोमर्य्याऽअपेशसे। समुषद्भिरजायथाः॥ केतवे नमः॥

ग्रहों के साथ अष्ट योगिनी का पूजन भी करें-

ॐ मंगलायै नमः। ॐ पिंगलायै नमः।
ॐ धान्यायै नमः। ॐ भ्राम्रिकायै नमः।
ॐ भद्रिकायै नमः। ॐ उल्कायै नमः।
ॐ सिद्धायै नमः। ॐ शंकटायै नमः।

नवग्रहों का पूजन गन्धाक्षत पुष्प, धूप, दीपक नैवेद्य दक्षिणा आदि से कर देवें॥



।। अधिदेवता स्थापन ।।

ॐ रुद्राय नमः। ॐ उमायै नमः।।
ॐ स्कन्दाय नमः। ॐ विष्णवे नमः।।
ॐ ब्रह्मणे नमः। ॐ इन्द्राय नमः।।
ॐ यमाय नमः। ॐ कालाय नमः।।
ॐ चित्रगुप्ताय नमः।।

अधिदेवताओं का पूजन गन्धाक्षत पुष्पादि से कर देंवे।

।। प्रत्यधिदेवता स्थापन ।।

ॐ अग्नये नमः। ॐ अद्भ्य नमः।।
ॐ पृथिव्यै नमः। ॐ विष्णवे नमः।।
ॐ इन्द्राय नमः। ॐ इन्द्राण्यै नमः।।
ॐ प्रजापतये नमः। ॐ सर्पेभ्य नमः।।
ॐ ब्रह्मणेभ्य नमः।।

प्रत्यधिदेवताओं का पूजन गन्ध अक्षतादि से कर देवें।

।। पंचलोकपाल देवता स्थापन ।।

ॐ गणपतये नमः।। ॐ दुर्गायै नमः। ॐ वायवे नमः।।
ॐ अन्तरिक्षाय नमः। ॐ अश्विभ्यां नमः।।

पंचलोकपाल देवताओं का पूजन गन्ध अक्षत पुष्पं धूप दीप नैवेद्य आदि से कर देंवे।

।। दशदिग्पाल देवता स्थापन।।

ॐ इन्द्राय नमः। ॐ अग्नये नमः।।
ॐ यमाय नमः। ॐ निर्ऋतये नमः।।

ॐ वरुणाय नमः। ॐ वायवे नमः।।

ॐ धनदाय नमः। ॐ ईशानाय नमः।।

ॐ ब्रह्मणे नमः। ॐ अनन्ताय नमः।।

सूर्यादि नवग्रहों के साथ अधिदेवता, प्रत्याधिदेवता, पंचलोकपाल देवता, दश दिक्पाल, देवताओं का पूजन, गन्ध, अक्षत, पुष्प, धूप, दीपक नैवेद्य दक्षिणा से कर प्रार्थना करें-

प्रार्थना

सूर्यः शौर्यमथेन्दुरुच्चपदाविं सन्मगलं मंगल।
सद्बुद्धिञ्च बुधौ गुरुश्च गुरुतां शुक्रः सुखं शं शनि।।
राहुर्वाहु बलंकरोतु सततं केतुः कुलस्योन्नतिम्।
नित्यं प्रीतिकरा भवन्तु मम ते सर्वेऽनुकूला ग्रहाः।।

आयुश्च विद्या च तथा सुखंच धर्मार्थलाभौ बहुपुत्रतां च।
शत्रु क्षयं राजसु पूज्यता च तुष्टा ग्रहाः क्षेम करा भवन्तु।।
ब्रह्मामुरारिस्त्रिपुरान्तकारि भानुः शशि भूमि सुतो बुधश्च।
गुरुश्च शुक्र शनि राहु केतु सर्वे ग्रहाः शान्तिकरा भवन्तु।।
यत् कृतं पूजनं देवः भक्ति श्रद्धा विवर्जितम्।

परिगृह्णातु तत्सर्वं सूर्याद्या ग्रहनायकाः।।
आदित्यादि ग्रहा सर्वे नाना वर्णे पृथग्विधा।
सुप्रसन्नाः प्रयच्छन्तु सौभाग्यं मम सर्वदाः।।
मंत्रहीनं क्रियाहीनं भक्ति हीनं तवार्चनम्।
यत् पूजितं मया देवः क्षम्यतां ग्रह देवता।।

।। इति नवग्रह पूजनम् ।।



।।सर्वतोभद्रदेवतास्थापनम्।।

एक समचौरस वेदी पर सर्वतो भद्र का निर्माण कर कलश स्थापित कर ब्रह्मादि देवताओं का आवाहन करें-

१. **मध्ये कर्णिकायाम्-**

ॐ भूभुर्वः स्वः ब्रह्मणे नमः। ब्रह्माणमावाहयामि स्थापयामि (आवाहयामि स्थापयामि सब देवताओं के नाम का उच्चारण करने के बाद कहता रहे)

२.उत्तरेवाप्याम्-ॐ भू० सोमाय नमः सोमं.........।

३.ईशन्यां खण्डेन्दौ-ॐ भू० ईशानाय नमः।

४.पूर्ववाप्याम्- ॐ भू० इन्द्राय नमः।

५.आग्नेयां खण्डेन्दौ-ॐ भू० अग्नये नमः।

६.दक्षिणेवाप्याम्- ॐ भू० यमाय नमः।

७.नैर्ऋत्यां खण्डेन्दौ- ॐ भू० निर्ऋतये नमः।

८.पश्चिमे वाप्याम्- ॐ भू० वरुणाय नमः।

९.वायव्यां खण्डेन्दौ- ॐ भू० वायवे नमः।

१०. वायु-सोमयोर्मध्ये- ॐ भू० अष्टवसुभ्यो नमः।

११. सोमेशानयोर्मध्ये- ॐ भू० एकादश रुद्रेभ्यो नमः।

१२. ईशानेन्द्रमध्ये- ॐ भू० द्वादशादित्येभ्यो नमः।

१३. पूर्वाग्नयोर्मध्ये- ॐ भू० अश्विभ्यां नमः।

१४. अग्नि यममध्ये- ॐ भू० विश्वेदेवेभ्यो नमः।

१५. यम-निर्ऋति मध्ये- ॐ भू० सप्त यक्षेभ्योनमः।

१६. निर्ऋति-पश्चिम मध्ये- ॐ भू० अष्टकुल नागेभ्योनमः।

१७. वरुण-वायु मध्ये-ॐ भू० गन्धर्वप्सरसे नमः।

१८. ब्रह्म-सोममध्ये- ॐ भू० स्कन्दाय नमः।
१९. स्कन्दोत्तरतः- ॐ भू० वृषभाय नमः।
२०. वृषवोत्तरे- ॐ भू० शूलाय नमः।
२१. तदुत्तरे- ॐ भू० महाकालाय नमः।
२२. ब्रह्मेशानमध्ये-ॐ भू० प्रजापतिभ्यो नमः।
२३. ब्रह्मेन्द्र मध्ये- ॐ भू० दुर्गायै नमः।
२४. तत्पूर्वे- ॐ भू० विष्णवे नमः।
२५. ब्रह्माग्निमध्ये- ॐ भू० स्वधायै नमः।
२६. ब्रह्म-यम मध्ये- ॐ भू० मृत्युरोगेभ्यो नमः।
२७. ब्रह्म-निर्ऋतिमध्ये- ॐ भू० गणपतये नमः।
२८. ब्रह्म-वरुण मध्ये- ॐ भू० अद्भ्यो नमः।
२९. ब्रह्मण वायु मूले- ॐ भू० मरुद्भ्यो नमः।
३०. ब्रह्मणपाद मूले- ॐ भू० पृथिव्यै नमः।
३१. तदुत्तरे- ॐ भू० गंगानदीभ्यो नमः।
३२. तदुत्तरे- ॐ भू० सप्त सागरेभ्यो नमः।
३३. कर्णिका परिधौ- ॐ भू० मेरवे नमः।
३४. ततः वाह्यपरिधौ सोमादि क्रमेण- ॐ भू० गदायै नमः।
३५. ईशान्याम्- ॐ भू० त्रिशूलायै नमः।
३६. पूर्वे- ॐ भू० वज्राय नमः।
३७. आग्नेयाम्- ॐ भू० शक्तये नमः।
३८. दक्षिणे- ॐ भू० दण्डाय नमः।
३९. नैर्ऋत्याम्- ॐ भू० खड्गाय नमः।
४०. पश्चिमे- ॐ भू० पाशाय नमः।
४१. वायव्याम्- ॐ भू० अंकुशाय नमः।


४२. तद्वाह्ये रक्तपरिधौ सोमादि क्रमेण-ॐ भू० गौतमाय नमः।
४३. ईशान्याम्- ॐ भू० भारद्वाजाय नमः।
४४. पूर्वे- ॐ भू० विश्वामित्राय नमः।
४५. आग्नेयाम्- ॐ भू० कश्यपाय नमः।
४६. दक्षिणे- ॐ भू० जमदग्नये नमः।
४७. नैर्ऋत्याम्- ॐ भू० वशिष्ठाय नमः।
४८. पश्चिमे- ॐ भू० अत्रये नमः।
४९. वायव्याम्- ॐ भू० अरुन्धत्यै नमः।
५०. तद्बाह्ये कृष्णपरिधौ-पूर्वे- ॐ भू० एन्द्र्यै नमः।
५१. आग्नेयाम्- ॐ भू० कौमार्यै नमः।
५२. दक्षिणे- ॐ भू० ब्राह्मयै नमः।
५३. नैर्ऋत्याम्- ॐ भू० वाराह्यै नमः।
५४. पश्चिमे- ॐ भू० चामुण्डायै नमः।
५५. वायव्ये- ॐ भू० वैष्णव्यै नमः।
५६. उत्तरे- ॐ भू० माहेश्वर्यै नमः।
५७. ईशान्याम्- ॐ भू० वैनायक्यै नमः।

सर्वतोभद्र देवताओं का पूजन गन्ध अक्षत, पुष्प, धूप, दीपक, नैवेद्य, दक्षिणा से कर लेवे।

प्रार्थना-

यस्य स्मृत्या च नामोक्त्या तपो यज्ञ क्रियादिषु।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

॥ इति सर्वतोभद्र देवता पूजनम्॥



॥ अष्ट सिद्धि पूजन ॥

ॐ अणिम्ने नमः॥१॥ ॐ महिम्ने नमः॥२॥ ॐ गरिम्ने नमः॥३॥ लघिम्ने नमः॥४॥ ॐ प्राप्त्यै नमः॥५॥ ॐ प्राकाम्यै नमः॥६॥ ॐ ईशितायै नमः॥७॥ ॐ वशितायै नमः॥८॥

अष्ट सिद्धियों का पूजन गन्ध अक्षतादि से कर लेवें।

॥ अष्ट लक्ष्मी पूजन॥

ॐ आद्यलक्ष्यै नमः॥१॥ ॐ विद्यालक्ष्म्यै नमः॥२॥ ॐ सौभाग्य लक्ष्म्यै नमः॥३॥ ॐ अमृतलक्ष्म्यै नमः॥४॥ ॐ कामलक्ष्म्यै नमः॥५॥ ॐ सत्य लक्ष्म्यै नमः॥६॥ ॐ योग लक्ष्म्यै नमः॥७॥ ॐ भोग लक्ष्म्यै नमः॥८॥

अष्ट सिद्धियों का पूजन गन्ध अक्षतादि से कर लेवें।

॥ श्री यंत्रस्थ देवतास्थापनम् ॥

मध्य में बिन्दु उसके बाहर त्रिकोण पुनः षट्कोण का निर्माण कर वृत्त बनावे उसके ऊपर आठ दल, पुनः वृत्त और उसके ऊपर चौबीस दल बनावे उसके बाहर चार द्वार का जो यंत्र बना है उसके ऊपर अक्षत डालते हुए पीठ पूजा करें-

बिन्दु मध्ये-

ऐं ह्रीं क्लीं चामुण्डायै विच्चे श्री महाकाली महालक्ष्मीमहासरस्वतीस्वरूपिणी श्री त्रिगुणात्मिका दुर्गादेवतायै नमः। श्री महाकालीमहालक्ष्मीमहासरस्वती दुर्गादेवतामावाहयामि स्थापयामि।

विन्दोः परितो-गुरुचतुष्टयमावाहयेत्- गुरुवे नमः

आवाहयामि स्थापयामि। आ.स्था. सब नामों के बाद उच्चारण करते हुए अक्षत वेदी पर डालते जायें।

परात्पर गुरुवे नमः। परमेष्ठिगुरुवे नमः। गुरुपंक्तये नमः।

षडंगम्- ॐ ऐं हृदयाय नमः। ह्रीं शिर से नमः।

क्लीं शिखायै नमः। चामुण्डायै कवचाय नमः।

विच्चे नेत्रत्रयाय नमः। मूलेन अस्त्राय नमः।

त्रिकोणे स्वाग्रादिप्रादक्षिण्येन क्रमेण-

स्वरया सह विधात्रे नमः। श्रिया सह विष्णवे नमः। उमया सह शिवाय नमः।।

दक्षिणे-हुं सिंहाय नमः। वामे हुं महिषाय नमः।

षट्कोणे- ॐ ऐं नन्दजायै नमः। ॐ ह्रीं रक्तदन्तिकायै नमः। ॐ क्लीं शांकभर्यै नमः। ॐ दुं दुर्गायै नमः। ॐ हुं भीमाय नमः। ॐ ह्रीं भ्रामर्यै नमः।।

अष्टपत्रे-ॐ ऐं ब्राह्मयै नमः। ॐ ह्रीं माहेश्वर्यै नमः।। ॐ क्लीं कौमार्यै नमः। ह्री वैष्णव्यै नमः हुं वाराह्यै नमः। ॐ क्ष्यौ नारसिह्यै नमः। ॐ लं एन्द्रयै नमः। स्फ्रैं चामुण्डायै नमः।।

चतुर्विंशतिदले- ॐ विं विष्णुमायायै नमः।

ॐ चें चेतनायै नमः। ॐ बुं बुद्ध्यै नमः।

ॐ निं निद्रायै नमः। ॐ क्षुं क्षुधाय नमः।

ॐ छां छायायै नमः। ॐ शं शक्त्यै नमः।

ॐ तृं तृष्णायै नमः। ॐ क्षां क्षान्त्यै नमः।

ॐ जां जात्यै नमः। ॐ लं लज्जायै नमः।

ॐ शां शान्त्यै नमः। ॐ श्रं श्रद्धायै नमः।

ॐ कां कान्त्यै नमः। ॐ लं लक्ष्म्यै नमः।
ॐ धृं धृत्यै नमः। ॐ वृं वृत्यै नमः।
ॐ श्रुं श्रुत्यै नमः। ॐ स्मृं स्मृत्यै नमः।
ॐ दं दयायै नमः। ॐ तुं तुष्ट्यै नमः।
ॐ पुं पुष्ट्यै नमः। ॐ मां मातृभ्यो नमः।
ॐ भ्रां भ्रान्त्यै नमः।।

भूपुरे कोण चतुष्टये आग्नेयादि कोणे-

ॐ गं गणपतये नमः। ॐ क्षं क्षेत्रपालाय नमः।
ॐ बं बटुकाय नमः। ॐ यां योगिन्यै नमः।

पूर्वादिदिक्षु-

ॐ इन्द्राय नमः। ॐ अग्नये नमः। ॐ यमाय नमः। ॐ निर्ऋतये नमः। ॐ वरुणाय नमः। ॐ वायवे नमः। ॐ धनदाय नमः। ॐ ईशानाय नमः। ॐ ब्रह्मणे नमः। ॐ अनन्ताय नमः।

तद्बहि :-

ॐ वज्राय नमः। ॐ शक्त्ये नमः। ॐ दण्डाय नमः। ॐ खड्गाय नमः। ॐ पाशाय नमः। ॐ अङ्कुशाय नमः। ॐ गदायै नमः। ॐ त्रिशूलायै नमः। ॐ पद्माय नमः। ॐ चक्राय नमः।

तद्बहिः-

ॐ वज्रहस्तायै गजारुढायै कादम्बरी देव्यै नमः।
ॐ शक्तिहस्तायै अजवाहनायै उल्कादेव्यै नमः।
ॐ दण्ड हस्तायै महिषारुढायै करालीदेव्यै नमः।
ॐ खड्गहस्तायै शववाहनायै रक्ताक्षी देव्यै नमः।

ॐ पाश हस्तायै मकरवाहनायै श्वेताक्षी देव्यै नमः।
ॐ अंकुश हस्तायै मृगवाहनायै हरिताक्षी देव्यै नमः।
ॐ गदा हस्तायै सिंहारुढायै यक्षिणी देव्यै नमः।
ॐ शूल हस्तायै वृषभ वाहनायै कालीदेव्यै नमः।
ॐ पद्म हस्तायै हंस वाहनायै सुरज्येष्ठा देव्यै नमः।
ॐ चक्र हस्तायै सर्पवाहनायै सर्पराज्ञी देव्यै नमः।।

नाम मात्र का उच्चारण कर यंत्र में यंत्रस्थ देवताओं का पूजन गन्ध अक्षत पुष्प, धूप, दीपक, नैवेद्य दक्षिण से कर देवें-

प्रार्थना-

सर्वमंगल मंगल्यै! शिवे! सर्वार्थ साधिके ।
शरण्ये त्र्यम्बके! गौरि! नारायणि! नमोऽस्तु ते।।

।। इति यंत्र पूजनम् ।।

" भैरव पूजन"

माँ दुर्गा का अनुचर होने के कारण भैरव का पूजन नवरात्रों के अवसर पर अत्यन्त आवश्यक है। भैरव का पूजन करने से साधक कष्ट रहित हो जाता है। भूत-प्रेत की बाधायें दूर हो जाती हैं। साधक ऐश्वर्य प्राप्ति कर दैहिक, दैविक और भौतिक दुःखों से मुक्त हो जाता है।

"भैरव ध्यान"

१. तामस ध्यान-

ध्यायेन्नीलाद्रि कांतिं शशिशकलधरं मुण्डमालं महेशम्।
दिग्वस्त्रं पिंगकेश डमरू हस्त सृणिं खड्गपाशाभयानि।।
नागं घण्टां कपालं करसरसिरूहैर्विभ्रतं भीमदष्ट्रम्।

दिव्याकल्पं त्रिनेत्रंमणिमयविलसत्किंकिणीनूपुराढ्यम्।

२. राजस ध्यान-

उद्यद्भाष्कर सन्निभंत्रिनयनं रक्तांगरागस्रजम्।
स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः॥
नीलग्रीवमुदार भूषणयुतं शीतांश खण्डोज्ज्वलम्।
बन्धू कारुण वाससं भयहरं देवं सदाभावये॥

३. सात्विक ध्यान-

बन्दे बालं स्फटिक सदृशं कुण्डलोद्भासिताङ्गम्।
दिव्याकल्पैर्नवमणिमयैः किंकिणीनूपुराढ्यै॥
दीप्ताकारं विशदवदनं सुप्रसन्नं त्रिनेत्रम्।
हस्ताग्राभ्यां बटुक सदृशं शूलदण्डोपधानम्॥

भैरव का पूजन गन्ध, अक्षत, पुष्प, धूप, दीप, नैवेद्य से कर दक्षिणा चढ़ा देवें।

सर्व मनोकामना पूर्ण करने वाला भैरव मंत्र-

ॐ ह्रीं बटुकाय आपदुद्धाहरण कुरु कुरु बटुकाय ह्रीं।

प्रार्थना-

कर कलित कपालः कुंडली दण्डपाणि।
स्तरुणतिमिरनीलो व्यालयज्ञोपवीती॥
क्रतुसमयसपर्या विघ्नविच्छेदहेतु।
जयति बटुकनाथ सिद्धिदः साधकानाम्॥

॥ इति भैरव पूजनम्॥



खड्गपूजन मंत्र

खड्गो वैश्वदेवः श्वा कृष्णः कर्णोगर्दभस्तर-क्षुस्तेरक्षसामिंद्राय सूकरः सि ँ हो मारुतः कृकलासः पिप्पकाशकुनिस्ते शरव्यायै विश्वेषां देवानां पृषतः॥

खड्ग का पूजन गन्ध अक्षत पुष्प धूप दीप आदि से कर खड्ग में कलावा बांध कर दुर्गा की मूर्ति के पास स्थापित कर देवें।

वाहन सिंह पूजन-

ॐ व्रजनख द्रष्ट्रायुधाय सिंहाय हुँ फट् नमः॥

दुर्गा के वाहन सिंह का पूजन गन्ध अक्षत पुष्प धूप दीपक आदि से कर देवें।

॥दुर्गा प्रतिमा प्राण प्रतिष्ठा॥

अद्येत्यादि० शुभपुण्य तिथौ ममात्मनः श्रुतिस्मृति पुराणोक्त फलप्राप्त्यर्थं मम सकल कुटुम्बानां क्षेम आयु आरोग्य एश्वर्याभिवृद्ध्यर्थ सकलकामना सिद्ध्यर्थ दुर्गामूर्तिनां प्राण प्रतिष्ठां करिष्ये॥

आचार्य दुर्गा की प्रतिमा पर घी लगाकर जल की धारा लगवाये स्वयं अग्न्युत्तारण के मंत्र पढ़े-

ॐ समुद्रस्य त्वावकयाग्ने परिव्ययामसि। पावको अस्मभ्य ँ शिवोभव॥१॥ ॐ हिमस्य त्वा जरायुणाग्ने परिव्ययासि। पावको अस्मभ्य ँ शिवोभव॥२॥ ॐ उपज्जमनुप वेतसेऽवतर नदीष्वा। अग्नेपित्तमपामम्मि मण्डूकि ताभिरागहि सेम नो यज्ञं पावकव्वर्णं ँ शिवं कृधि॥३॥

ॐ अपामिदं न्ययन ॐ समुद्रस्य निवेशनम्। अन्यास्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्य ॐ शिवोभव॥४॥ ॐ अग्ने पावक रोचिषा मन्द्रया देव जिह्वया। आ देवान् वक्षि यक्षिच॥५॥ स नः पावक दीदिवोऽअग्नेदेवाँऽइहावह। उपयज्ञ ॐहविश्च नः य ॥६॥ पावकयायश्चितयत्न्या कृपा क्षामन् रुरु चऽउषसो न भानुना। तूर्वन्न यामन्नेतशस्य नू रणऽआ यो घृणे न त तृषाणो ऽ अजरः॥७॥ ॐ नमस्ते हरसे शोचिते नमस्ते ऽअस्त्वर्चिषे। अन्यांस्ते ऽअस्मत्तपन्तु हेतयः पावको ऽअस्मभ्य ॐ शिवोभव॥८॥ ॐ नृषदे वेडप्सुषदे वेड् वर्हिषदे वेड् वनसदे वेट् स्वर्विदे वेट्॥९॥ ये देवा देवाना यज्ञिया यज्ञियाना ॐ संवत्सरीणमुप भागमासते। आहुता दो हविषो यज्ञेऽ अस्मिन्त्स्वयं पिवन्तु मधुनो घृतस्य॥१०॥ ये देवा देवे स्वधि देवत्वमायन्ये ब्रह्मणः पुरऽ एतारो ऽ अस्य। येभ्यो नऽ ऋते पवते धाम किञ्चन ते दिवो न पृथिव्या ऽ अधि स्नुषु॥११॥ ॐ प्राणदा ऽअपानदा व्यानदा व्वर्चोदा वरिवोदाः। अन्याँस्ते ऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्य ॐ शिवोभव॥१२॥

इस प्रकार अग्न्युत्तारण कर प्राण प्रतिष्ठा का विनियोग करें-

विनियोग-

ॐ अस्य श्री प्राण प्रतिष्ठा मंत्रस्य ब्रह्म विष्णु रुद्राः ऋषयः ऋग्यजुः सामाथर्वाणि छन्दासि क्रिया मय वयुः प्राणाख्या देवता आं बीजं ह्रीं शक्ति क्रौं कीलकम् अस्यां नूतन मूर्तौ प्राणप्रतिष्ठापने विनियोगः॥

स्वर्ण निर्मित प्रतिमा को बाये हाथ में रख दाहिने हाथ की हथेली से ढककर बीजमंत्रों को पढ़कर प्राणप्रतिष्ठा करें।

ॐ आं ह्रीं क्रौ यं रं लं वं शं षं सं क्षं हंसः।।
अस्य मूर्तीनां प्राणाइह तिष्ठन्तु।
ॐ आं ह्री क्रौ यं रं लं वं शं षं सं क्षं हंसः।।
अस्य मूर्तीना सर्वेन्द्रियाणि तिष्ठन्तु।
ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं क्षं हंसः।।
अस्य मूर्तीनां वाङ्मनस्त्वक्चक्षु श्रोत्रजिह्वा घ्राण पाणिपाद पायुपस्थानि इहागत्य चिरं तिष्ठन्तु स्वाहा।।
अस्यै प्राणा प्रतिष्ठन्तु अस्यै प्राणा क्षरन्तु च।
अस्यै देवत्वमर्चायै मामहेति च कश्चन।।१।।
आगच्छ वरदे देवि! दैत्यदर्प निषूदिनि।
पूजा गृहाण सुमुखी! नमस्ते शंकर प्रिये।।२।।

ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तन्नो त्वरिष्ठं यज्ञ ॐ समिमन्द धातु।। विश्वेदेवा स इह मादयन्ता ३मो प्रतिष्ठ।। एष वै प्रतिष्ठा नाम यज्ञो यत्रे तेन यज्ञेन यजन्ते सर्वमेव प्रतिष्ठतं भवति।।

प्रतिष्ठा कर १६ मंत्र श्री सूक्त से स्नान करवा आचार्य मूर्ति को गायत्री मंत्र सुनावे।


प्रार्थना-

एह्येहि दुर्गे! दुरितौघ नाशिनि ।
प्रचण्ड-दैत्योघ-विनाशकारिणि ।
उमे महेशार्द्ध-शरीर धारिणि ।
स्थिरा भव त्वं मम यज्ञ कर्मणि ।।

।। इति दुर्गा प्राण प्रतिष्ठा सम्पूर्णम्।।

॥ महाकाली महालक्ष्मी महासरस्वती ध्यान ॥

खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुण्डीं शिरः।
शंख संदधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम्॥
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां।
यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम् ॥१॥
अक्षस्त्रकपरशुं गदेषुकुलिशं पद्मं धनुःष्कुण्डिकां।
दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम्॥
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रसन्नाननां।
सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥२॥
घण्टाशूलहलानि शंखमुसले चक्रं धनुः सायकं।
हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभाम्॥
गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महा-
पूर्वामत्र सरस्वतीमनु भजे शुम्भादिदैत्यार्दिनीम् ॥३॥
महाकाली महालक्ष्मीर्महाशक्ति सरस्वती।
त्रिशक्तिर्नाम विख्याता त्रिर्देवीभ्यो नमोनमः ॥४॥



॥ दुर्गा पूजन ॥

अग्न्युतारण की हुई प्रतिमा को अथवा दुर्गा मूर्ति को वेदी के ऊपर रख[1] हाथ में रक्त पुष्प लेकर भगवती दुर्गा का ध्यान करे-

ध्यानम्-

ॐ सिंहस्था शशिशेखरा मरकतप्रख्यैश्चतुर्भिर्भुजैः।
शंखचक्रधनुः शरांश्चदधती नेत्रैस्त्रिभिः शोभिता॥
आमुक्तांगद हारकंकणरणत्काञ्चीरणन्नू पुरा।
दुर्गा दुर्गतिहारिणी भवतु नो रत्नोल्लसत्कुण्डला॥१॥
या माया मधुकैटभ प्रमथिनी या माहिषोन्मूलिनी।
या धूम्रेक्षण चण्डमुण्डमथिनी या रक्तबीजासिनी॥
शक्तिः शुम्भनिशुम्भदैत्यदलिनी या सिद्ध लक्ष्मीपरा।
सा दुर्गा नवकोटि मूर्ति सहिता मां पातु विश्वेश्वरी॥२॥

रक्त पुष्प देवी पर चढ़ा देवे।

आवाहन-

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्।
चन्द्रां हिरण्यमयीं लक्ष्मीं जातवेदो म आवह॥
संसार जननीं सत्यां कामदां करुणाकराम्।
अनन्त शक्ति सम्पन्ना दुर्गामावाहयाम्यहम्॥

---

१. देवी प्रतिमा स्थापन दिशा विचार-

याम्यास्या सुभदा दुर्गा पूर्वास्या जय वर्द्धिनी।
पश्चिमाभिमुखी नित्यं न स्थाप्या सौम्यदिग्मुखिम्।
श्री सूक्तेन सुभक्त्याऽथदेवि संपूजयिष्यति।
सप्तजन्मान्तरण्येव न भविष्यतिसोऽधनः (नागरखण्डे)

दुर्गा देवी पर अक्षत डाल आवाहन करें।

आसन-

ॐ तामं ऽ आवह जातवेदो लक्ष्मी मनपगामिनीम्।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥
रम्यं सुशोभनं दिव्यं सर्वसौख्यंकरं शुभम् ।
आसनं च मयादत्तं गृहाणं परमेश्वरी ॥

माँ दुर्गा को सुवर्ण का अथवा पुष्प आसन अर्पण कर दें।

पाद्य-

अश्वपूर्वां रथमध्यां हस्तिनाद-प्रबोधिनीम्।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम्॥
उष्णोदकं निर्मलं च सर्व सौगन्ध्य संयुतम्।
पाद प्रक्षालनार्थाय गृहाण जगदम्बिका॥

शुद्ध जल को पैर धोने के लिए अर्पण करें।

अर्घ्य-

कां सोऽस्मितां हिरण्यप्राकारामाद्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्।
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम्॥
स्वर्ण पात्र स्थितं तोयं गन्धपुष्प फलान्वितम्।
सहिरण्य ददाम्यर्घ्यं गृहाण परमेश्वरी॥

अर्घ्य में जल भर गन्ध पुष्प फल दक्षिणा सहित अर्पण करें।

आचमन-

चन्द्रां प्रभासां यशसा ज्वलन्तीं
श्रियं लोके देवजुष्टामुदाराम्।
तां पद्मनेमिं शरणं प्रपद्ये
अलक्ष्मिर्मे नश्यतां त्वां वृणो मि॥

सर्वतीर्थ समायुक्तं सुगन्धि निर्मलं जलम्।
स्नानार्थ मया दत्तं गृहाण परमेश्वरी॥

आचमन जल सुंगन्धियुक्त कर अर्पण कर देवें।

पयस्नान-

ॐ पयः पृथिव्यां पयऽओषधीषु पयोदिव्यन्तरिक्षे पयोधाः।
पयस्वतीः प्प्रदिशः सन्तु मह्यम्॥
कामधेनुसमुद्भूतं सर्वेषां जीवनं परम्।
पावनं तव हेतुश्च पयस्नानं मयार्पितम्॥

दुर्गा देवी को स्नान के लिए पय चढ़ाकर आचमन जल अर्पण कर देवें।

दधि स्नान-

ॐ दधिक्राव्णोऽअकारिषं जिष्णोरश्वस्यव्वाजिनः।
सुरिभ नो मुखा करत्प्रणऽआयूꣳषितारिषत्॥
पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम्।
दध्यानीतं मया देवि! स्नानार्थं प्रतिगृह्यताम्॥

भगवती दुर्गा देवी को दही से स्नान करवाकर पुनः जल से स्नान करवायें।

घृत स्नान-

ॐ घृतं घृत पावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्यहविरसि स्वाहा। दिशः प्रदिश ऽआदिशोविदिशऽउद्दिशोदिग्भ्यः स्वाहा॥

नवनीत समुत्पन्नं सर्वसन्तोष कारकम्।
घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम्।

भगवती दुर्गा देवी को घी से स्नान करवाकर पुनः जल

से स्नान करवायें।

मधु स्नान-

ॐ मधु व्वाता ऽ ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्तोषधीः।। मधुनक्तमुतोषसो मधुमत्पार्थिव ँ रजः। मधु द्यौ रस्तु नः पिता।। मधुम्मान्नोव्वनस्पतिर्मधुमां अस्तु सूर्य्यः माध्वीर्गावो भवन्तु नः।।

वृक्ष पुष्प समुद्भूतं सुस्वादु मधुरं मधु।
तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम्।।

दुर्गा देवी का मधु से स्नान कर पुनः जल से स्नान करवायें।

शर्करा स्नान-

ॐ अपा ँ रसमुद्वयस ँ सूर्य्ये सन्त ँ समाहितम्। अपा ँ रसस्य यो रसस्तं वो गृह्णाम्युतममुपयाम गृहीतोऽसीन्द्राय त्त्वा जुष्टं गृह्णाम्येष ते योनि रिन्द्रायत्वा जुष्टतमम्।।

इक्षुसार समुद्भूता शर्करा पुष्टिकारिका ।
मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम्।।

दुर्गा देवी को शर्करा से स्नान करवा पुनः जल से स्नान करवायें।

पंचामृत स्नान-

आदित्यवर्णेतपसोऽधिजातोवनस्पतिस्तव वृक्षोऽथ विल्वः। तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च वाह्य अलक्ष्मीः।।

ॐ पञ्चनद्यः सरस्वतीमपियन्ति सस्त्रोतसः।
सरस्वती तु पञ्चधा सो देशेऽभवत् सरित्।

पयोदधि घृतं चैव मधु च शर्करा युतम्।
पंचामृतं मयाऽनीतं स्नानार्थं प्रतिगृह्यताम्॥

दुर्गा देवी को पंचामृत से स्नान करवा पुनः जल से स्नान करवायें।

गन्धोदक स्नान-

गन्ध द्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्व भूतानां तामिहोपह्वये श्रियम्॥
मलयाचल सम्भूतं चन्दनाऽगरुसम्भवम्।
गन्धोदक मया देवि स्नानार्थं प्रतिगृह्यताम्॥

दुर्गा देवी को गन्ध, जल से स्नान करवा पुनः जल से स्नान करवायें।

उबटन-

ॐ अ ॐ शुना ते अ ॐ शुः पृच्यतां परुषा परुः।
गन्धस्ते सोममवतु मदाय रसो ऽ अच्युतः॥
नाना सुगन्धि द्रव्यं च चन्दनं रजनी युतम्।
उद्वर्तनं मया दतं स्नानार्थ प्रतिगृह्यताम्॥

भगवती दुर्गा को उबटन करवा पुनः जल से स्नान करवाये॥

शुद्ध स्नान-

ॐ शुद्धवालः सर्व्वशुद्धवालोमणिवालस्तऽआश्विनाः। श्येतः श्येताक्षोऽरुणते रुद्राय पशुपतये कर्णायामाऽअवलिप्ता रौद्द्रा नभो रूपाः पार्जन्याः॥

कावेरी नर्मदा वेणी चन्द्रभागा सरस्वती।
गंगा च यमुना ऽ सां वाः स्नानार्थं प्रतिगृह्यताम्॥

दुर्गा देवी को तीर्थो के जल से शुद्ध स्नान करवायें।

वस्त्र-[१]

उपैतु मां देव सखः कीर्तिश्च मणिना सह।
प्रादुर्भूतो सुराष्ट्रेऽस्मिन् कीर्तिमृद्धिंददातु मे।।
सर्वभूषादिके सौम्ये लोकलज्जा निवारिणे।
मयोपपादिते तुभ्यं गृहाण परमेश्वरी।।

दुर्गा देवी को वस्त्र अर्पण कर एक आचमन जल छोड़ दें।

कज्जल-

चक्षुर्भ्यां कज्जलं रम्ये सुभगेशान्तिकारिके।
कर्पूरज्योतिरुत्पन्ना गृहाण परमेश्वरी।।

दुर्गा देवी की आंखों में कज्जल लगायें।

सुगन्धि द्रव्य-

चन्दनागरु कपूर्र कुंकुमंरोचनं तथा ।
कस्तूर्यादि सुगन्ध्या च सर्वांगेषु विलेपनम्।।

दुर्गा देवी का इत्र आदि सुगन्धि द्रव्यों से विलेपन कर देवें।

अबीर गुलाल-

अबीर गुलालं परिद्रव्यै निर्मितं चूर्णउत्तमम्।
अबीर नामक चूर्णं गन्धचारूपगृह्यताम्।।

दुर्गा देवी को अबीर गुलाल चूर्ण चढ़ा देवें।

---

१. देवताओं के वस्त्र-

पीतं विष्णौ सितं शम्भो रक्तांविघ्नार्कशक्तिषु।
सच्छिद्रंमलिनं जीर्णं त्यजेतैलादि दूषितम्।।

आभूषण–

स्वभाव सुन्दरांगायै नानादेवाश्रये शुभा।
भूषणानि विचित्राणि कल्पयाम्यस्तव अर्च्चयै।।

दुर्गा देवी को नाना प्रकार के आभूषण अर्पण कर देंवे।

हार कंकण–

हार कंकण केयूर मेखला कुण्डलादिभि।
रत्नाढ्यं कुण्डलोपेतं भूषणं प्रतिगृह्यताम्।।

दुर्गा देवी को हार कंकण आदि अर्पण कर देवें।।

गन्ध–

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्।।
श्रीखण्ड चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम्।
विलेपनं महादेवी चन्दनं प्रतिगृह्यताम्।।

दुर्गादेवी को गन्ध लगावें।

अक्षत–

ॐ अक्षन्नमीमदन्त ह्यव प्प्रियाऽअधूषत ।
अस्तोषत स्वभानवो व्विप्रा न विष्ठया मतीयोजान्विन्द्र ते हरी।।
अक्षतान् निर्मलान् शुद्धान् मुक्तामणि समन्वितान्।
गृहाणेन महादेवी देहि मे निर्मलां मतिम्।।

दुर्गा देवी को अक्षत लगा देवे।

पुष्प–

मनसः काममाकूतिं वाचः सत्यमशीमहि।
पशूनां रूपमन्नस्य मयि श्री श्रयतां यशः।।

मन्दार-पारिजातादि- पाटली केतकानि च।
जाति-चम्पक-पुष्पाणि गृहाण परमेश्वरी।
(दुर्गा देवी को नाना प्रकार के पुष्प अर्पण करें)

पुष्प माला-

कर्दमेन प्रजा भूता मयि सम्भ्रम कर्दम।
श्रियंवासय मे कुले मातरं पद्ममालिनीम्।।
पद्म शंखज-पुष्पादि शतपत्रैर्विरर्चितम्।
पुष्पमालां प्रयच्छामि गृहाणत्वं सुरेश्वरि।।

दुर्गा देवी को पुष्पमाला अर्पण कर देवें।

धूप-

आपः सृजन्तु स्निग्धानि चिक्लीत वसमे गृहे।
नि च देवीं मातरं श्रियं वासय मे कुले।।
दशांग-गुग्गुलं धूपं चन्दनाऽगरु संयुतम्।
समर्पितं मया भक्त्या गृहाण परमेश्वरी।।

माँ दुर्गा को धूप दिखायें।

दीपक-

आर्द्रां पुष्पकरिणीं पुष्टिं पिंगलां पद्ममालिनीम्।
चन्द्रां हिरण्यमयिं लक्ष्मीं जातवेदो म आवह।।
साज्यं वर्तिसंयुक्तं वह्निना योजितं मया।
दीपं गृहाण देवेशि त्रैलोक्य तिमिरापह।।

दुर्गा देवी को दीपक दिखाये।।

नैवेद्य-

आर्द्रां यः करिणीं यष्टीं सुवर्णां हेममालिनीम्।
सूर्यां हिरण्यमयीं लक्ष्मीं जातवेदो म आवह।।

अन्नं चतुर्विधं स्वादु-रसैः षड्भि समन्वितम्।
नैवेद्यं गृह्यतां देवि भक्ति मे ह्यचलां कुरु॥

दुर्गा देवी को नैवेद्य अर्पण कर एक आचमन जल छोड़ देवें।

दक्षिणा-

हिरण्य गर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेकऽआसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विद्येम॥

पूजाफल समृद्ध्यर्थ तवाग्रे स्वर्णमीश्वरी।
स्थापितं तेन मे प्रीत्या पूर्णान् कुरु मनोरथान्॥

ताम्बूल-

ताम्य आवह जातवेदो लक्ष्मी मनपगामिनीम्।
यस्यां हिरण्यं प्रभूतिं गावोदास्याऽश्वान् विन्देयपुरुषानहम्॥
पूगीफल महाद्दिव्यं नागवल्लि-दलैर्युतम्।
एलादि चूर्ण संयुक्तं ताम्बूलं प्रतिगृह्यताम्॥

ऋतुफल-

ॐ याः फलिनीर्य्याऽअफलाऽअपुष्पायाश्च पुष्पाणिः।
बृहस्पतिप्रसूतास्तानो मुञ्चन्त्व ॐ हसः॥
फलेन फलितं देवि त्रैलोक्यं स चराचरम्॥
तस्मात् फल प्रदानेन पूर्णासन्तु मनोरथाः॥

मां दुर्गा को फल चढ़ाये।

क्षत्र-

ॐ ध्रुवाऽसि ध्रुवोऽयं यजमानोऽस्मिन्नाय्यतने प्रजया पशुभिभूर्यात । घृतेन द्यावा पृथिवी पूर्येथामिन्द्रस्य छदिरसि विश्वजनस्य छाया।

दुर्गा को छत्र डुलाये।

चामर-

अहाव्यग्ने हविरास्ये ते स्रुचीव घृतं चम्बीव सोमः।
वाजसनि ॐ रयिमस्मे सुवीरं प्रशस्तं धेहि यशसं बृहन्तम्॥

चामर ढुलायें।

दर्पण-

ॐ रजता हरिणीः सीसा युजो युजन्ते कर्मभिः।
अश्वस्य वाजिनस्त्वचि सिमाः शम्यन्तु शम्यन्तीः॥

दर्पणं निर्मलं दिव्यं परिविम्बेसिविग्रहे।
कुरु दृष्टि महाभागं आदर्श दर्शयाम्यहम्॥

दुर्गा देवी को दर्पण दिखायें।

अंग पूजनः-

ॐ दुर्गायै नमः पादौ पूजयामि। ॐ महाकाल्यै नमः गुल्फौ पूजयामि। ॐ मङ्गलायै नमः जानुद्वयं पूजयामि। ॐ कात्यायन्यै नमः उरुद्वयं पूजयामि। ॐ भद्रकाल्यै नमः कटिं पूजयामि। ॐ कमल वासिन्यै नमः नाभिं पूजयामि। ॐ शिवायै नमः उदरं पूजयामि। ॐ क्षमायै नमः हृदयं पूजयामि। ॐ कौमार्ये नमः स्तनौ पूजयामि। ॐ उमायै नमः हस्तौ पूजयामि। ॐ महागौर्ये नमः दक्षिण वाहुं पूजयामि। ॐ वैष्णव्यै नमः वामवाहु पूजयामि। ॐ रमायै नमः स्कन्धौ पूजयामि। ॐ स्कन्दमात्रे नमः कण्ठं पूजयामि।

---

1. वर्जनीय वाद्य-**शिवांगारे झल्लकं च सूर्यागारे च शंखकम्।**
दुर्गागारे वंशीवाद्यं माधुरिच न वादयेत्॥
(झल्लकं कांस्य निर्मितं करताल) (योगिनी तंत्रे)
2. आरती दर्शन फल- **धूपं चारार्तिकं पश्येत्कराभ्यां च प्रवदन्ते।**
कुलकोटि समुद्धृत्य यति देव्याः परम्पदम्॥

ॐ महिषासुर मर्दिन्यै नमः नेत्रे पूजयामि। ॐ सिंह वाहिन्यै नमः मुखं पूजयामि। ॐ माहेश्वर्ये नमः शिरः पूजयामि कात्यायन्यैनमः सर्वाङ्गं पूजयामि॥

उपरोक्त प्रत्येक नाम से गन्धाक्षत पुष्प धूपादि अर्पण कर देवें।

कर्पूर आरती–घी के दीपक अथवा कर्पूर जलाकर घण्टा आदि बजाते हुए दुर्गा देवी के चरणों में चार बार, नाभि देश में दो बार मुख पर एक बार और समस्त अंगों में सात बार आरती घुमायें।

मंत्र :-

ॐ ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ। अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम्॥१॥

ॐ आ रात्रि पार्थिव ꣳ रजः पितुरप्रायि धामभिः। दिवः सदा ꣳसि बृहति वितिष्ठस आ त्वेषं वर्तते तमः॥२॥ ॐ इद ꣳ हविः प्रजननं मे अस्तु दशवीर ꣳ सर्वगण ꣳ स्वस्तये। आत्मसनि प्रजासनि पशुसनि लोकसन्य भयसनि। अग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतो अस्मासु धत्त॥३॥

चन्द्रादित्यौ च धरणी विद्युदग्नि स्तथैव च।
त्वमेव सर्वज्योतीषिं आर्तिक्य प्रतिगृह्यताम्॥

प्रार्थना–

मंत्रहीनं क्रियाहीनं यत्कृतं चण्डिकास्तवम्।
सर्वे सम्पूर्णतामेति कृते नीराजने शिवे॥

मंत्रपुष्पाञ्जलि-

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्त यत्रपूर्वे साध्याः सन्तिदेवाः।।

ॐ राजाधिराजाय प्रसह्य साहिने नमो वयं वैश्रवणाय कुर्महे स मे कामान् कामकामाय मह्यं कामेश्वरो वैश्रवणो ददातु। कुवेराय वैश्रवणाय महाराजाय नमः।।

ॐ स्वस्ति साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात् सार्वभौमः सार्वायुषऽआन्तादापरार्धात्। पृथिव्यै समुद्रपर्यन्ताया-ऽएकराडिति तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे। आविक्षितस्य कामाप्रेर्विश्वेदेवा सभासद इति।।

ॐ विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात्। सम्बाहुभ्यां धमति। सम्पतत्रैद्यावा भूमि जनयन् देव एकः।। ॐ कात्यायनाय विद्महे कन्यकुमारि धीमहि तन्मो दुर्गेः प्रचोदयात्।।

ॐ देव्यै ब्रह्माण्यै च विद्महे। महाशक्त्यै च धीमहि। तन्नोदेवी प्रचोदयात्।।

सेवन्तिका-बकुल-चम्पक-पाटलाब्जैः
पुन्नाग-जाति-करवीर-रसाल-पुष्पैः।
विल्व-प्रवाल-तुलसी दल मञ्जरीभिः
त्वां पूजयामि जगदीश्वरि मे प्रसीद।।

---

१. परिक्रमा देवताओं की कितनी हो-
एकाचण्डयां रवौसप्त तिस्त्रोदद्याद्विनायके।
चतस्त्रः केशवेदेया शिवस्यार्द्ध प्रदक्षिणा।। (आ०सु०)

नाना सुगन्ध पुष्पाणि यथाकालो भवानि च।
पुष्पाञ्जलिं मयादत्तं गृहाण परमेश्वरी॥

मां दुर्गा देवी को पुष्पाञ्जलि देकर परिक्रमा [1] कर लेवें-

प्रदक्षिणा -

ॐ सप्तास्यासन्नपरिधयस्त्रिः सप्त समिधः कृताः देवा यद्यज्ञं तन्वानाऽअबध्नपुरुषं पशुम्॥

॥ इति दुर्गा पूजनम् ॥

॥ कालरात्रि पूजन॥

कालरात्रि पूजन के लिए यंत्र का निर्माण करें, पहले बिन्दु बनावे, बिन्दु के बाहर षट्कोण का निर्माण करें, षटकोण के बाहर वृत्त का निर्माण कर अष्ट दल बनावें पुनः वृत्त बनाकर सोलह दल बना पुनः वृत्त का निर्माण करें। बाहर यन्त्रोक्त रेखा का निर्माण करें।

कालरात्रि ध्यान-

उद्यन्मार्तण्डकान्तिविगलितकवरींकृष्णवस्त्रावृतांगीम्।
दण्डंलिंगकराब्जैर्वरमथभुवनं संदधानां त्रिनेत्राम्॥
नानाकल्पौधमासांस्मितमुखकमलांसेवितांदेवसंघै।
र्मायांराज्ञीं मनोभूशरविकलतनूमाश्रयेकालरात्रिम्॥

कालरात्रि का पूजन रात्रिसूक्त से कर प्रार्थना करें।

जयन्ति मङ्गला काली भद्रकाली कपालिनी।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तुते॥
जय त्वं देवि चामुण्डे जय भूतार्तिहारिणी।
जय सर्व गते देवि कालरात्रि नमोऽस्तु ते॥

॥ नवकन्या पूजनम्॥[१]

शप्तशती पाठ में कन्या पूजन का विधान है यजमान उन कन्याओं का पूजन करे जो दो वर्ष से लेकर दश वर्ष की आयु की हो। सम्पूर्ण मनोरथ सिद्धि के लिए ब्राह्मण कन्या का, यश प्राप्ति के लिए क्षत्रिय कन्या का, सन्तान प्राप्ति के लिए शूद्र की कन्या का पूजन विधान बतलाया गया है। भगवान शंकर प्रोक्त मंत्रों से नवकन्या का पूजन करना चाहिए कन्या पूजन कर बटुक पूजन करें-

कन्याओं का आवाहन-

मंत्राक्षरमयीं लक्ष्मी मातृणां रूपधारिणीम्।
नव दुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहम्॥

आवाहन कर निम्नलिखित एक-एक मंत्र बोलकर एक-एक कन्या का गन्ध, पुष्प, धूप, दीप, भक्ष्य, भोज्य, वस्त्र, अलंकार आदि से पूजन करें-

१. कुमारी पूजन मंत्र-

जगत्पूज्ये जगद्वन्द्ये सर्वशक्ति स्वरूपिणी।
पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तु ते॥

२. त्रिमूर्ति पूजन मंत्र-

त्रिपुरां त्रिपुराधारां त्रिवर्ग ज्ञानरूपिणीम्।
त्रैलोक्य वन्दितां देवीं त्रिमूर्ति पूजयाम्यहम्॥

३. कल्याणी पूजन मंत्र-

कालात्मिकां कलातीतां कारुण्यहृदयां शिवाम्।
कल्याण जननीं देवीं कल्याणीं पूजयाम्यहम्॥

---

१. **कन्या पूजन फल-**
न तथा तुष्यते शक्रः होमदान जपैन तु।
कुमारी भोजने नात्र यथादेवी प्रसीदती॥ **(देवी पुराण)**

४. रोहिणी पूजन मंत्र-

अणिमादि गुणाधारामकाराद्यक्षरात्मिकाम्।
अनन्तशक्तिकां लक्ष्मी रोहिणीं पूजयाम्यहम्॥

५. कालिका पूजन मंत्र-

कामाचारां शुभां कान्तां कालचक्रस्वरूपिणीम्।[१]
कामदां करुणोदारां कालिकां पूजयाम्यहम्॥

६. चण्डिका पूजन मंत्र-

चण्डवीरां चण्डमायां चण्डमुण्डप्रभञ्जिनीम्।
पूजयामि सदा देवीं चण्डिकां चण्डविक्रमाम्॥

७. शाम्भवी पूजन मंत्र-

सदानन्दकरीं शान्तां सर्वदेवनमस्कृताम् ।
सर्वभूतात्मिकां लक्ष्मी शाम्भवीं पूजयाम्यहम्॥

८. दुर्गा पूजन मंत्र-

दुर्गमे दुस्तरे कार्ये भवदुःख विनाशिनिम्।
पूजयामि सदा भक्त्या दुर्गां दुर्गतिनाशिनीम्॥

९. सुभद्रा पूजन मंत्र-

सुन्दरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीम्।
सुभद्रजननीं देवीं सुभद्रा पूजयाम्यहम् ॥

॥ इति नवकन्या पूजनम्॥

---

१. वर्णभेद से कन्या पूजन फल-
गौरी सर्वेष्ट संसिद्ध्यै पीताङ्गी जय कीर्तये।
लाभार्थेऽरुण वर्णाङ्गीमसिता मारणादिष्विति॥
जाति भेद से कन्या पूजन-
ब्रह्मणीं सर्वे कार्येषु जयार्थे नृपवंशजाम्।
लाभार्थे वैश्य वंशोत्था सुतार्थे शुद्रवंशजाम्॥ (कैलावली तंत्रे)

२. वर्ज्य कन्या-
हीनाधिकांगी कुष्टादि विकारां कुकुलां तथा।
ग्रन्थिस्फुटितं सर्वाङ्गी रक्तपूय वर्णाङ्किता॥
जात्यन्धां केकरा काणां कुरूपां तनुरोमशाम्।
संत्यजेद्रोगिणीं कन्यां दासीगर्भ समुद्भवाम्। -कौलावली तंत्रे

॥ वटुक पूजन ॥

कर कलित-कपालः कुण्डली-दण्डपाणि-
स्तरुण-तिमिरनील-व्यालयज्ञोपवीती।
क्रतुसमय-सपर्याद् विघ्नविच्छेदहेतु-
र्जयति बटुकनाथ सिद्धिदः साधकानाम्॥

॥ इति बटुक पूजनम् ॥

॥ पुस्तक पूजन ॥

यजमान सप्तशती पुस्तक का पूजन निम्न मंत्रों से करें-

नमो दैव्ये महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नीयताः प्रणताः स्म ताम्॥

पुस्तक का पूजन गन्ध, अक्षत, पुष्प, धूप, दीपक, नैवेद्य से कर दक्षिणा चढ़ा देवें-

सरस्वती (पुस्तक) मंत्र-

ॐ पावका नः सरस्वती वाजेभिर्वाजिनीवती।
यज्ञंवष्टु धियावसुः॥

पूजन मंत्र-

श्री सप्तशती स्वरूपिण्यै ह्रीं चण्डिकायै नमः॥

पुस्तक का पूजन गन्ध अक्षत पुष्प आदि से कर पुष्प लेकर सरस्वती को प्रणाम करें-

याकुन्देन्दु तुषारहार धवला या शुभ्रवस्त्रावृता
यावीणा वरदण्डमण्डितकरा या श्वेत पद्मासना।

याब्रह्माच्युत शंकरप्रभृतिभिर्देवैसदावन्दिता
सा मां पातु सरस्वती भगवती निःशेष जाड्यापहा॥
शुक्लां ब्रह्म विचार सारपरमामाद्यां जगत् व्यापिनीं
वीणा-पुस्तक धारिणीमभयदां जाड्यान्धकारापहाम्।
हस्तेस्फाटिक मालिकां विदधतीं पद्मासने संस्थिताम्
वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम्॥

॥ इति सरस्वती पूजन ॥



दुर्गा सप्तशती

॥ अथ सप्तश्लोकी दुर्गा ॥

शिव उवाच-

देवि त्वं भक्तसुलभे सर्वकार्यविधायिनी।
कलौ हि कार्यसिद्ध्यर्थमुपायं ब्रूहि यत्नतः॥

देव्युवाच-

शृणु देव प्रवक्ष्यामि कलौ सर्वेष्टसाधनम्।
मया तवैव स्नेहेनाप्यम्बास्तुतिः प्रकाश्यते॥

ॐ अस्य श्री दुर्गासप्तश्लोकीस्तोत्रमन्त्रस्य नारायण ऋषिः अनुष्टुप् छन्दः श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः श्रीदुर्गाप्रीत्यर्थं सप्तश्लोकीदुर्गापाठे विनियोगः॥

ॐ ज्ञानिनामपि चेतांसि देवी भगवति हि सा।
बलादाकृष्य मोहाय महामाया प्रयच्छति॥१॥

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि।
दारिद्र्यदुःखभयहारिणी का त्वदन्या
सर्वोपकारकरणाय सदार्द्रचित्ता॥२॥

सर्वमङ्गलमङ्गल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते॥३॥

शरणागतदीनार्तपरित्राणपरायणे।
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते॥४॥

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते॥५॥

रोगानशेषानपहंसि तुष्टा
रुष्टा तु कामान् सकलानभीष्टान्।
त्वामाश्रितानां न विपन्नराणां
त्वामाश्रिता ह्याश्रयतां प्रयान्ति॥६॥

सर्वबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि।
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम्।।७।।
इति श्रीसप्तश्लोकी दुर्गा सम्पूर्ण।।
।। श्री दुर्गायै नमः ।।

श्री दुर्गाष्टोत्तरशतनामस्तोत्रम्

ईश्वर उवाच

शतनाम प्रवक्ष्यामि श्रृणुष्व कमलानने।
यस्य प्रसादमात्रेण दुर्गा प्रीता भवेत् सती।।१।।
ॐ सती साध्वी भवप्रीता भवानी भवमोचनी।
आर्या दुर्गा जया चाद्या त्रिनेत्रा शूलधारिणी।।२।।
पिनाकधारिणी चित्रा चण्डघण्टा महातपाः।
मनो बुद्धिरहंकारा चित्तरूपा चिता चितिः।।३।।
सर्वमन्त्रमयी सत्ता सत्यानन्दस्वरूपिणी।
अनन्ता भाविनी भाव्या भव्याभव्या सदागतिः।।४।।
शाम्भवी देवमाता च चिन्ता रत्नप्रिया सदा।
सर्वविद्या दक्षकन्या दक्षयज्ञविनाशिनी।।५।।
अपर्णानेकवर्णा च पाटला पाटलावती।
पट्टाम्बरपरीधाना कमलमञ्जीररञ्जिनी।।६।।
अमेयविक्रमा क्रूरा सुन्दरी सुरसुन्दरी।
वनदुर्गा च मातङ्गी मतङ्गमुनिपूजिता।।७।।
ब्राह्मी माहेश्वरी चैन्द्री कौमारी वैष्णवी तथा।
चामुण्डा चैव बाराही लक्ष्मीश्च पुरुषाकृतिः।।८।।
विमलोत्कर्षिणी ज्ञाना क्रिया नित्या च बुद्धिदा।
बहुला बहुलप्रेमा सर्ववाहनवाहना।।९।।
निशुम्भशुम्भहननी महिषासुरमर्दिनी।
मधुकैटभहन्त्री च चण्डमुण्डविनाशिनी।।१०।।
सर्वासुरविनाशा च सर्वदानवघातिनी।

सर्वशास्त्रमयी सत्या सर्वास्त्रधारिणी तथा॥११॥
अनेकशस्त्रहस्ता चअनेकास्त्रस्य धारिणी।
कुमारी चैककन्या च कैशोरी युवती यतिः॥१२॥
अप्रौढा चैव प्रोढा च वृद्धमाता बलप्रदा।
महोदरी मुक्तकेशी घोररूपा महाबला॥१३॥
अग्निज्वाला रौद्रमुखी कालरात्रिस्तपस्विनी।
नारायणी भद्रकाली विष्णुमाया जलोदरी॥१४॥
शिवदूती कराली च अनन्ता परमेश्वरी।
कात्यायनी च सावित्री प्रत्यक्षा ब्रह्मवादिनी॥१५॥
य इदं प्रपठेन्नित्यं दुर्गानामशताष्टकम्।
नासाध्यं विद्यते देवि त्रिषु लोकेषु पार्वती॥१६॥
धनं धान्यं सुतं जायां हयं हस्तिनमेव च।
चतुर्वर्ग तथा चान्ते लभेन्मुक्तिं च शाश्वतीम्॥१७॥
कुमारी पूजयित्वा तु ध्यात्वा देवीं सुरेश्वरीम्।
पूजयेत् परया भक्तया पठेन्नामशताष्टकम्॥१८॥
तस्य सिद्धिर्भवेद् देवि सर्वैः सुरवरैरपि।
राजानो दासतां यान्ति राज्यश्रियमवामुयात्॥१९॥
गोरोचनालक्तककुङ्कमेन, सिन्दूरकर्पूरमधुत्रयेण।
विलिख्य यन्त्रं विधिना विधिज्ञो, भवेत् सदा धारयते पुरारीः॥२०॥
भौमावास्यानिशामग्रे चन्द्रे शतभिषां गते।
विलिख्य प्रपठेत् स्तोत्रं स भवेत् संपदां पदम्॥ २१॥
इति श्री विश्वसारतन्त्रे दुर्गाष्टोत्तरशतनामस्तोत्र सम्पूर्णम्।

॥ सप्तशती पाठ संकल्प ॥

ॐ विष्णुर्विष्णुर्विष्णुः ॐ नमः परमात्मने श्रीपुराण-पुरुषोत्तमस्य अद्य श्री ब्रह्मणो ह्नि द्वितीय परार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भरतखण्डे भारतवर्षे आर्यावर्त्तान्तर्गत

